नान्यद्वारा कारयितव्यम्। अतएव उपवासेनैव श्राद्धस्थानीयेन तदकरणप्रायश्चित्तेन वा कृतकृत्यतया श्राद्धविघ्ने इत्यादिवचनादपि नैकादश्यामनुष्ठानमिति तन्न। पितृत्वेनैरजातत्वेनैकादश्यां तदनुष्ठानस्य युक्तत्वात्। अन्यथा षोड़शश्राद्धाधिकारिणः कदाचित्तथात्वे।

"यस्यैतानि न दीयन्ते प्रेतश्राद्धानि षोड़श।
पिशाचत्वं ध्रुवं तस्य दत्तैः श्राद्धशतैरपि॥"

इति यमवचनेन षोड़शश्राद्धाभावे प्रेतत्वपरीहारो न स्यात्। तस्मादुपवासो न श्राद्धार्थः किन्तु तदाभोक्तनाकरणप्रायश्चित्तार्थः। यथा स्वकालाकृतसंस्कारे प्रायश्चित्तं कृत्वा कालान्तरे तत्करणं तथाचापि तद्दिने उपवासं कृत्वा एकादश्यां श्राद्धं कर्त्तव्यमिति। एकोद्दिष्टं नान्यद्वारा कार्य्यमित्यत्रापि गोत्रजेतरत्वेन विशेषणीयम्।

"न कदाचित् सगोत्राय श्राद्धं कार्य्यमगोत्रजैः।"
इति प्रेतश्राद्धे ब्रह्मपुराणात्।

अत्र हि नागोत्रजस्य साक्षात्कर्तृत्वं निषिध्यते सगोत्रायेत्यसम्बन्धापत्तेः। तस्मात् अगोत्रजैर्द्वारभूतैः सगोत्राय श्राद्धं न कार्य्यमित्यर्थः। तथा च पर्य्युदासपक्षे गोत्रजद्वारा कारयितव्यमिति सुव्यक्तमेव। प्रसज्यपक्षे तु अगोत्रजविशेषणस्वरसात् गोत्रजलाभः। प्रेतश्राद्धधर्म्मग्राहित्वात् सांवत्सरिकमपि तथेति श्राद्धविवेकः। कल्पतरुरत्नाकरयोस्तु स्वगोत्रायेति पठितं स्वमात्मीयं गोत्रं यस्य स स्वगोत्रः विद्यमानगोत्र इत्यर्थः। यस्मै श्राद्धं कर्त्तव्यं तस्य स्वगोत्रजे विद्यमानेऽन्यगोत्रजेन संघातान्तर्गतेन राज्ञा श्राद्धं न कारयितव्यमिति व्याख्यातञ्च। एतन्मतेऽप्यूढ़दुहित्रादीनामसगोत्रत्वेऽपि न निषेधः। वस्तुतस्तु तत्पाठेऽपि कर्म्मधारयापेक्षया बहुव्रीहेर्जघन्यत्वात् स्वमात्मीयञ्च तत् गोत्रञ्चेति तस्मै अन्यगोत्रजद्वारा श्राद्धं न कार्य्यमित्यर्थः। अतो लघुहारीतवचने स्वयं पदं स्वगोत्रपरम्। अन्यथा ब्रह्मपुराणोक्तागोत्रजपदवैयर्थ्यापत्तेः॥ * एवञ्च भविष्यपुराणप्रभासखण्डयोः।

"मृताहनि पितुर्य्यस्तु न कुर्य्यात् श्राद्धमादरात्।
मातुश्चैव वरारोहे वत्सरान्ते मृताहनि।
नाहन्तस्य महादेवि! पूजां गृह्णामि नो हरिः॥"

मरीचिः।

"पक्षिता नाविनो मर्त्याः स्त्रियोऽथ ब्रह्मचारिणः।
मृताहं समतिक्रम्य चाण्डालेष्वभिजायते॥"

इत्याभ्यां कालमाधवीयधृताभ्यां वचनाभ्यां सांवत्सरिकश्राद्धस्य मृताहकर्त्तव्यत्वेनावश्यकत्वात भविष्यन्मृताहे स्वयं कर्त्तव्यत्वसम्भावनारहितेन मृतातात् पूर्व्वकालेऽपि प्रतिनिधीयते।

"प्रविष्यामिं स्वदारेषु परिकल्प्यार्त्विजं तथा।
प्रवसेत् कार्य्यवान् विप्रो वृथैव न चिरं क्वचित्॥"

इति छन्दोगपरिशिष्टोक्तसायं प्रातर्होमप्रतिनिधिवत्। एवं सति प्रतिनिध्यकरण एव एकादश्यां क्रियते॥ *॥ न च पाकस्याङ्गत्वेन प्रधानतिथिकर्त्तव्यतानियम इति वाच्यम्।

"व्रतोपवासनियमे घटिकैका यदा भवेत्।
सा तिथिः सकला ज्ञेया पित्रर्थे चापराह्णिकी॥"

इति वचनेन मुहूर्त्तमात्रलाभेऽपि कर्त्तव्यतोपदेशात् तदानीं पाके तदसम्भवात्। एवमुदीच्याङ्गशेषभोजनेऽपि न तन्नियमः। इति श्राद्धतत्त्वम्॥ (गणके, पुं। यथा, वृहत्संहितायाम्। २। १२।

"नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता।
चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते॥")

**सांवादिकः**, पुं, (सम्यक् वादाय प्रभवतीति। संवाद+ठञ्।) नैयायिकः। यथा,—

"नैयायिकः साक्षपादः स्यात्सांवादिक आहितः॥"
इति जटाधरः॥

संवादवक्तरि, त्रि॥

**सांशयिकः**, त्रि, (संशयमापन्नः। संशय+"संशयमापन्नः।" ५। १। ७३। इति ठञ्।) संशययुक्तः। तत्पर्य्यायः। संशयापन्नमानसः २। इत्यमरः। ३। १। ५॥ सन्दिहानः ३। इति जटाधरः॥ द्वे संशयविषये स्याखादौ। संशयमापन्नः सांशयिकः खिकः संशयमापन्नं मानसं यत्र स्याखादौ स तथा। संशयमापन्नं मानसं यस्य स तथेति षष्ठ्यन्तपदार्थत्वे संशयितरि पुरुषादावप्येतच्छब्दद्वयप्रवृत्तिः स्यादिति भरतः॥ (संशयविषयकः। यथा, मार्कण्डेये। १०। ४५।

"तद्ब्रूहि त्वं महाभाग यत् ते सांशयिकं हृदि॥")

**सांस्थानिकः**, त्रि, (संस्थाने व्यवहरतीति। संस्थान+"कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति।" ४। ४। ७२। इति ठक्।) समानदेशीयः। इति सिद्धान्तकौमुदी॥ संस्थानयुक्तश्च॥

**सांस्राविणं**, क्ली, इचस्य इषं वाप्य सम्यक् स्रावः। इति संक्षिप्तसारोणादिवृत्तिः॥

**साकं**, व्य, सहार्थम्। इत्यमरः। ३। ४। ४॥ (यथा, कथासरित्सागरे। ४। १३६।

"अहं जनन्या गुरुभिश्च साकमावासं लक्ष्मीमवसं चिराय॥")

**साकल्यं**, क्ली, (सकल+भावे ष्यञ्।) समुदायः। सकलस्य भावः। (यथा, मनुः। १२। २५।

"यो यदैषां गुणो देहे साकल्येनातिरिच्यते।
स तदा तद्गुणप्रायं तं करोति शरीरिणम्॥")

**साकारः**, त्रि, (आकारेण सह वर्त्तमानः।) आकारविशिष्टः। यथा,—

"साकारञ्च निराकारं सगुणं निर्गुणं प्रभुम्।
सर्व्वाधारञ्च सर्व्वञ्च स्वेच्छारूपं नमाम्यहम्॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ३२। ३१॥

**साकुरुण्डः**, पुं, (सकुरुण्ड एव। स्वार्थे अण्।) वृक्षविशेषः। सकुरुण्डर इति गुर्ज्जरदेशीयभाषा। तत्पर्य्यायः। ग्रन्थिफलः २ विकटः ३ वनभूषणः ४ कुरुण्डः ५ कर्व्वूरफलः ६ सकुरुण्डः ७। अस्य गुणाः। कषायत्वम्। रुचिकारित्वम्। दीपनत्वम्। सारकत्वम्। श्लेष्मवातनाशित्वम्। वस्त्ररञ्जनकत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥

**साकेतं**, क्ली, अयोध्यानगरम्। इति शब्दरत्नावली॥ (यथा, रघुः। ५। ३१।

"जनस्य साकेतनिवासिनस्तौ
द्वावप्यभूतामभिवन्द्यसत्त्वौ॥")

**साक्तुकः**, पुं, (सक्तुषु साधुः। सक्तु+"गुड़ादिभ्यष्ठञ्।" ४। ४। १०३। इति ठञ्।) यवः। इति सिद्धान्तकौमुदी॥ (सक्तूनां समूहः। सक्तु+"अचित्तहस्तिधेनोष्ठक्।" ४। २। ४७। इति ठक्।) सक्तुसमूहे, क्ली। सक्तुसम्बन्धिनि, त्रि॥ (सक्तवे प्रभवतीति। "तस्मै प्रभवति संतापादिभ्यः।" ५। १। १०१। इति ठञ्। सक्तुसमर्थे च त्रि॥)

**साक्षरं**, त्रि, अक्षरयुक्तम्। अक्षरेण सह वर्त्तमानम्। इति बहुव्रीहिसमासनिष्पन्नम्॥

**साक्षात्**, व्य, प्रत्यक्षम्। (यथा, कुमारे। ६। २२।

"साक्षात् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा,
प्रसीद कथयात्मानं न धियां पथि वर्त्तसे॥")

तुल्यम्। इत्यमरः। ३। ३। २४॥

**साक्षी**, [न्] त्रि, (अक्षेण दर्शनेन्द्रियेण सह वर्त्तमानं यत् तत् साक्षं प्रत्यक्षज्ञानम्। तदस्यास्तीति। साक्ष+इनिः।) दृष्टा। इति हेमचन्द्रः॥ तत्पर्य्यायः। प्रत्यक्षदर्शनः २। इति शब्दमाला॥ तस्य मिथ्याकथने अकथने च दोषो यथा, महाभारते आदिपर्व्वणि।

"पृष्टो हि साक्षी यः साक्ष्यं जानन्नप्यन्यथा वदेत्।
स पूर्व्वानात्मनः सप्त कुले हन्यात्तथापरान्॥
यश्च कार्य्यार्थतत्त्वज्ञो जानन्नपि न भाषते।
सोऽपि तेनैव पापेन लिप्यते नात्र संशयः॥"

अपि च।

"ब्रह्मस्वस्याप्यहारी च मिथ्यासाक्ष्यप्रदायकः।
मित्रद्रोही कृतघ्नश्च वृषवाहकसूपकृत्॥
एते महापातकिनश्चैव लोकेषु निन्दिताः।
कालसूत्रे च नरके पतन्ति ब्रह्मणः शतम्॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे। ३४। ५०; ५४॥

अपरञ्च।

"मिथ्यासाक्ष्यं यो ददाति कामात् क्रोधात्तथा भयात्।
सभायां पाक्षिकं वक्ति स कृतघ्न इति स्मृतः॥
मिथ्यासाक्ष्यं पाक्षिकं वा भारते वक्ति यो नृप।
यावदिन्द्रसहस्रञ्च सर्पकुण्डे वसेद्ध्रुवम्॥
सन्ततं वेष्टितैः सर्पैर्भीतञ्च भक्षितस्तथा।
भुङ्क्ते च सर्पविण्मूत्रं यमदूतेन ताड़ितः॥
कृकलासो भवेत्तत्र भारते सप्तजन्मसु।
सप्तजन्मसु मण्डूकः पितृभिः सप्तभिः सह॥
ततो भवेच्च वृक्षश्च महारण्ये च शाल्मलिः।
ततो भवेन्नरो मूकस्ततः शूद्रस्ततः शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४६ अध्यायः॥ *॥